# बाल भारती पब्लिक स्कूल, पीतम पुरा, दिल्ली।

**साप्ताहिक योजना**

**सप्ताह - 23 -27 नवंबर**

**कालांश - 3**

**कक्षा - दशमी**

**विषय - संस्कृत**

**उपविषय - सौहार्दं प्रकृतेः शोभा**

**शिक्षण अधिगम - छात्र पाठ का अभ्यास कर सकेंगे।**

- **समस्त कार्य करने के पश्चात छात्र एक पीडीएफ बनाकर इसे GC पर अपलोड करेंगे**

BBPS, PITAMPURA

# 7. सौहार्दं प्रकृतेः शोभा

प्रश्न 1 गद्यांशान् संवादान् च पठित्वा प्रश्नान् उत्तरत-

1. वनस्य दृश्यम् समीपे एवैका नदी अपि वहति। एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति। एवमेव वानराः वारं वारं सिंहं तुदन्ति। क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति। वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति। निद्राभङ्गदुःखेन वनराजः सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति-

**शब्दार्थाः (Word-meanings Sanskrit to Hindi)**

वहति–बहती है, विश्राम्यते–आराम करता है। पुच्छम्–पूँछ को। धुनोति–पकड़कर घुमा देता है। क्रुद्धः–क्रोधित। प्रहर्तुम्–मारने के लिए। वृक्षम् आरूढः–पेड़ पर चढ़ गया। आकृष्य–खींचकर। तुदन्ति–तंग करते हैं। एतादृशीम्–ऐसी। हर्षमिश्रितम्–प्रसन्नता से मिलीजुली। कलरवम्–चहचहाहट। निद्राभङ्गदुःखेन–नींद के भंग होने के दुःख से। सन्नपि–होता हुआ। तुच्छजीवैः–छोटे जीवों से। आत्मनः–अपनी। एतादृश्या–ऐसी। दुरवस्थया–बुरी स्थिति से। श्रान्तः–थका हुआ। सर्वजन्तून्–सब जीवों से। पृच्छति–पूछता है।

I एकपदेन उत्तरत-

1) वने समीपे एव का वहति ?
2) कः सुखेन विश्राम्यते ?
3) वानरः कस्य पुच्छं धुनोति ?
4) सिंहः कं प्रहर्तुमिच्छति ?
5) वानरस्तु कूर्दित्वा कुत्र आरूढः ?
6) के वारं वारं सिंहं तुदन्ति ?
7) अपरः वानरः सिंहस्य कम् आकर्षति ?
8) के हर्षमिश्रितं कलरवं कुर्वन्ति ?
9) वनराजः कान् पृच्छति ?
10) कस्य समीपे एका नदी वहति ?

II पूर्णवाक्येन उत्तरत-

1) अन्यस्मात् वृक्षात् अपरः वानरः किं करोति ?

2) सिंहस्य एतादृशीं दशां दृष्ट्वा वानराः पक्षिणः च किं कुर्वन्ति ?

3) क्रुद्धः सिंहः किं करोति ?

4) निद्राभङ्गदुःखेन वनराजः सन्नपि सिंहः किं करोति ?

BBPS, PITAMPURA

III भाषिक-कार्यम् -

| | | | | |
|---|---|---|---|---|
| 1) | 'वहति' इति क्रियापदस्य कर्तृपदं किम्? | समीपे | नदी | एका |
| 2) | 'विश्राम्यते' इति क्रियापदस्य कर्तृपदं किम्? | सिंहः | वानरः | एकः |
| 3) | 'वानराः' इति पदस्य क्रियापदं किम्? | धुनोति | आरोहति | हसन्ति |
| 4) | 'सिंहः' पदस्य विशेषणपदं किम्? | एका | क्रुद्धः | विविधाः |
| 5) | 'प्रसन्नः' पदस्य विपर्ययपदं चिनुत। | अपरः | दुःखेन | क्रुद्धः |
| 6) | 'पक्षिणः' पदस्य क्रियापदं किम्? | कूर्दन्ति | हसन्ति | तुदन्ति |
| 7) | 'तस्य' सर्वनाम कस्मै प्रयुक्तम्? | वानराय | सिंहाय | अपराय |
| 8) | 'तुदन्ति' क्रियापदस्य कर्तृपदं किम्? | वानराः | पक्षिणः | वनराजः |

2. सिंहः – (क्रोधेन गर्जन्) भोः! अहं वनराजः किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?

एकः वानरः – यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्व रक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि?

अन्यः वानरः – किं न श्रुता त्वया पञ्चतन्त्रोक्तिः–

यो न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा।
जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः॥

**शब्दार्थाः (Word-meanings Sanskrit to Hindi)**

गर्जन्–गरजते हुए। जायते–उत्पन्न होता है। माम् एवम्–मुझे इस प्रकार से। तुदन्ति–तंग करते हैं। यतः–क्योंकि। भवितुम्–होने में। स्वरक्षायाम्–अपनी रक्षा में। समर्थः–योग्य। तर्हि–तो। वित्रस्तान्–विशेष रूप से डरे हुओं को। पीड्यमानान्–पीड़ित होते हुओं को। परैः–दूसरों के द्वारा। जन्तून्–जीवों को। पार्थिवरूपेण–राजा के रूप में। कृतान्तः–यमराज है।

I एकपदेन उत्तरत -

1) सर्वे मिलित्वा कं तुदन्ति?
2) रक्षकः कः भवति?
3) भक्षकः कः अस्ति?
4) सिंहेन का न श्रुता?
5) यो वित्रस्तान् जन्तून् न रक्षति सः किं भवति?
6) आत्मानं वनराजं कः मन्यते?

II पूर्णवाक्येन उत्तरत -

1) सिंहः पशून् कथं वदति?

2) सिंहः वानरान् किं वदति?

3) प्रथमः वानरः सिंहं किं वदति?

BRPS, PITAMPURA

5) कः कृतान्तः भवति ?

III भाषिक कार्यम् –

| | | | | |
|---|---|---|---|---|
| 1) | 'माम्' सर्वनाम कस्मै प्रयुक्तम् ? | सिंहाय | वानराय | रक्षकाय |
| 2) | 'पूर्णरूपेण' इत्यर्थे किं पदमत्र प्रयुक्तम् ? | किमर्थं | सर्वथा | तर्हि |
| 3) | 'भक्षकः' पदस्य विपर्ययपदं चिनुत । | पार्थिवरूपेण | रक्षति | रक्षकः |
| 4) | 'श्रुतं' पदस्य कर्तृपदं किमस्ति ? | यः | त्वया | अहं |
| 5) | 'रक्षति' पदस्य कर्तृपदं किमस्ति ? | यः | अहम् | त्वम् |
| 6) | 'यमराजः' इत्यर्थे किं पदमत्र प्रयुक्तम् ? | संशयः | कृतान्तः | लोकः |
| 7) | जन्तून् पदस्य विशेषणपदं चिनुत । | क्रोधेन | पार्थिवरूपेण | विस्रस्तान् |
| 8) | 'त्वम्' पदं कस्मै प्रयुक्तम् ? | सिंहाय | वानराय | भक्षकाय |

3. काकः –आम् सत्यं कथितं त्वया–वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

पिकः –( उपहसन् ) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का-का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रूपं न ध्वनिरस्ति। कृष्णवर्णं, मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम्?

काकः –अरे! अरे! किं जल्पसि? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा–'अनृतं वदसि चेत् काकः दशेत्'-इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम् अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

पिकः –अलम् अलम् अतिविकत्थनेन। किं विस्मर्यते यत् –

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।<br>
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥

**शब्दार्थाः (Word-meanings Sanskrit to Hindi)**

**कथितम्** – कहा। **वस्तुतः** – वास्तव में। **उपहसन्** – मज़ाक करती हुई। **भवितुम्** –होने में। **कर्कशध्वनिना**–कठोर आवाज से। **आकुलीकरोषि** – व्याकुल करते हो। **मन्यामहे** – मानें। **जल्पसि** – बड़बड़ाती हो। **गौराङ्गः**–गोरे रंग की (के)। **विस्मर्यते**–भूल जाती हो। **सत्यप्रियता**–सच से प्रेम। **दशेत्**– डुस ले। **ऐक्यम्** – एकता (को)। **विश्वप्रथितम्** – संसार में फैली है। **अतिविकत्थनेन** – अधिक आत्मा प्रशंसा करते/डींगें मारने से। **काकः**–कौआ। **कृष्णः**–काला। **पिकः**–कोयल। **भेदः**–अन्तर। **पिककाकयोः**–कोयल और कौए में। **प्राप्ते**–आने पर (प्राप्त होने पर)। **वसन्तसमये**–वसन्त ऋतु का समय।

I एकपदेन उत्तरत

1) कः उपहसन् वदति ?

2) कीदृशः छात्रः आदर्शच्छात्रः मन्यते ?

3) काकः केन वातावरणमाकुलीकरोति ?

4) काकस्य किं गुणं जनानां कृते उदाहरणस्वरूपा ?

5) केषां परिश्रमः ऐक्यं च विश्वप्रथितम् ?

6) कदा पिककाकयोः भेदः ~~भवति~~ ? जायते ?

7) अनृतं वदसि चेत् कः दशेत् ?

8) कः वातावरणम् आकुलीकरोति ?

II पूर्णवाक्येन उत्तरत –

BBPS PITAMPURA

1) काकः पिकं स्वविषये किं कथयति?

2) पिकः उपहसन् किं वदति?

3) पिकस्य वर्णः कीदृशः अस्ति?

4) कीदृशं काकं सर्वे वनराजं न मन्यन्ते?

III भाषिक-कार्यम् -

| | | | | |
|---|---|---|---|---|
| 1) | 'अहमेव योग्यः' अत्र 'अहम्' सर्वनाम कस्मै प्रयुक्तम्? | काकाय | पिकाय | सिंहाय |
| 2) | 'मेध्यम्' पदस्य विपर्ययपदं चिनुत। | अनृतम् | अमेध्यम् | कथितम् |
| 3) | 'मन्यामहे' क्रियापदस्य कर्तृपदं किमस्ति? | वानराः | पक्षिणः | वयम् |
| 4) | 'वदसि' पदस्य पर्यायपदं चिनुत। | जल्पसि | कथितम् | दशेत् |
| 5) | 'कृष्णवर्णः' पदस्य विपर्ययपदं किम्? | परिश्रमः | गौराङ्गः | योग्यः |
| 6) | 'मम' सर्वनाम कस्मै प्रयुक्तम्? | वानराय | पिकाय | काकाय |
| 7) | 'असत्यं' पदस्य पर्यायपदं किमस्ति? | अनृतम् | ऐक्यम् | सत्यप्रियः |
| 8) | 'दशेत्' पदस्य कर्तृपदं किम्? | त्वम् | काकः | पिकः |
| 9) | 'आलस्यं' पदस्य विपर्ययपदं किम्? | अनृतं | ऐक्यं | परिश्रमः |
| 10) | 'आत्मश्लाघया' इत्यर्थे किं पदमत्र प्रयुक्तम्? | आतिविकत्थनेन | भक्षकः | त्वया |

4. काकः –रे परभृत्! अहं यदि तव संततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः।

गजः –समीपतः एवागच्छन्-अरे! अरे! सर्वां वार्तां शृण्वन्नेवाहम् अत्रागच्छम्। अहं विशालकायः, बलशाली, पराक्रमी च। सिंहः वा स्यात् अथवा अन्यः कोऽपि। वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि। किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी। अतः अहमेव योग्यः वनराजपदाय।

वानरः –अरे! अरे! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति।)

**शब्दार्थाः (Word-meanings Sanskrit to Hindi)**

सन्ततिम्–सन्तान को। विशालकायः–बड़े शरीर वाला। तर्हि–तो। परभृत्!–दूसरों पर पलने वाली। शृण्वन्नेव–सुनते हुए ही। तुदन्तम्–तंग करते हुए को। स्युः–होवें। जन्तुम्–जीव को। करुणापरः–दयालु। पोथयित्वा–लपेटकर। पक्षिसम्राट्–पक्षियों का राजा। एतादृशः–ऐसा। समीपतः–पास से। विधूय–मरोड़कर। आरोहति–चढ़ जाता है।

I एकपदेन उत्तरत -

1) काकः कं 'परभृत' इति कथयति?

2) करुणापरः, पक्षिसम्राट् कः अस्ति?

3) कः समीपतः एवागच्छन् वदति?

4) कः विशालकायः पराक्रमी च अस्ति?

BBPS, PITAMPURA

6) कः गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति ?

7) काकः कस्य सन्ततिं पालयति ?

II पूर्णवाक्येन उत्तरत

1) काकः पिकाय किं कथयति ?

2) गजः आत्मप्रशंसायां किं वदति ?

3) वानरः किं कृत्वा वृक्षोपरि आरोहति ?

III भाषिक-कार्यम् -

| | | | | |
|---|---|---|---|---|
| 1) | '(नीचैः)' पदस्य विपर्ययपदं चिनुत। | उपरि | वृक्षोपरि | यदि |
| 2) | 'स्युः' पदस्य कर्तृपदं चिनुत। | तर्हि | पिकाः | काकः |
| 3) | 'काकः' पदस्य विशेषणपदं किमस्ति? | पराक्रमी | परभृत् | पक्षिसम्राट् |
| 4) | 'आरोहति' क्रियापदस्य कर्तृपदं चिनुत। | काकः | वानरः | गजः |
| 5) | 'सर्वा वार्ता' अनयोः पदयोः विशेष्यपदं किम्? | वार्ता | सर्वा | करुणापरः |
| 6) | 'पालयामि' पदस्य कर्तृपदं किमस्ति? | पिकः | काकः | अहम् |

5. (गजः तं वृक्षमेव स्वशुण्डेन आलोडयितुमिच्छति परं वानरस्तु कूर्दित्वा अन्यं वृक्षमारोहति। एवं गजं वृक्षात् वृक्षं प्रति धावन्तं दृष्ट्वा सिंहः अपि हसति वदति च।)

सिंहः – भोः गज! मामप्येवमेवातुदन् एते वानराः।

वानरः – एतस्मादेव तु कथयामि यदहमेव योग्यः वनराजपदाय येन विशालकायं पराक्रमिणं, भयंकरं चापि सिंहं गजं वा पराजेतुं समर्था अस्माकं जातिः। अतः वन्यजन्तूनां रक्षायै वयमेव क्षमाः।

(एतत्सर्वं श्रुत्वा नदीमध्यः एकः बकः)

बकः – अरे! अरे! मां विहाय कथमन्यः कोऽपि राजा भवितुमर्हति अहं तु शीतले जले बहुकालपर्यन्तम् अविचलः ध्यानमग्नः स्थितप्रज्ञ इव स्थित्वा सर्वेषां रक्षायाः उपायान् चिन्तयिष्यामि, योजनां निर्मीय च स्वसभायां विविध-पदमलंकुर्वाणैः जन्तुभिश्च मिलित्वा रक्षोपायान् क्रियान्वितान् कारयिष्यामि अतः अहमेव वनराजपदप्राप्तये योग्यः।

मयूरः – (वृक्षोपरितः-साट्टहासपूर्वकम्) विरम विरम आत्मश्लाघायाः किं न जानासि यत्–

यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा।
अकर्णधारा जलधौ विप्लवेतेह नौरिव॥

**शब्दार्थाः (Word-meanings Sanskrit to Hindi)**

**स्वशुण्डेन**–अपनी सूँड़ से। **आलोडयितुम्**–हिलाने में/हिलाया। **कूर्दित्वा**–कूदकर। **आरोहति**–चढ़ जाता है। **धावन्तम्**–दौड़ते हुए को। **माम्**–मुझे/मुझको। **अतुदन्**–तंग किया है। **वनराजपदाय**–जंगल के राजा के पद हेतु। **पराक्रमिणम्**–वीर। **पराजेतुम्**–हराने के लिए। **समर्था** -समर्थ है। **रक्षायै** –रक्षा के लिए। **क्षमाः**–समर्थ हैं। **नदीमध्यः**–नदी के बीच से। **विहाय**–छोड़कर। **कथम्**–कैसे। **अन्यः**–दूसरा। **भवितुमर्हति**–हो सकता है। **अविचलः**–शान्त। **स्थितप्रज्ञ**–योगी। **निर्मीय**–निर्माण करके। **अलंकुर्वाणैः**–सुशोभित करने वालों से। **जन्तुभिः**–जीवों के द्वारा। **क्रियान्वितान्**–क्रियान्वित। **कारयिष्यामि**–कराऊँगा। **आत्मश्लाघायाः**–अपनी प्रशंसा से। **यदि** – यदि। **अकर्णधारा** – कान तक के जल वाले। **स्यात्**– हो। **जलधौ** – सागर में। **नरपतिः** – राजा। **विप्लवेत्** – डूब जाए। **सम्यङ्नेता** – अच्छा नेता। **इह** – इस संसार में। **ततः** – उससे। **नौः** – नौका।

BBPS PITAMPURA